RJITE PARI VRINGDHI GHANAM

1 ऋजींते परि पर्यृजींत ऋजींते परिं वृङ्ग्धि वृङ्ग्धि पर्यृजींत ऋजींते परिं वृङ्ग्धि ।

2 परिं वृङ्ग्धि वृङ्ग्धि परि परिं वृङ्ग्धि नो नो वृङ्ग्धि परि परिं वृङ्ग्धि न : ।

3 वृङ्ग्धि नो नो वृङ्ग्धि वृङ्ग्धि नो ऽश्माऽश्मां नो वृङ्ग्धि वृङ्ग्धि नोऽश्मां ।

4 नो ऽश्माऽश्मां नो नो ऽश्मां भवतु भवत्वश्मां नो नो ऽश्मां भवतु ।

5 अश्मां भवतु भव त्वश्मा ऽश्मां भवतु नो नो भव त्वश्मा ऽश्मां भवतु न : ।

6 भवतु नो नो भवतु भवतु नस्तनू स्तनू र्नो भवतु
भवतु नस्तनू : ।

7, 7a नस्तनू स्तनू र्नो नस्तनू : । तनूरिति तनू : ॥

8 सोमो - अध्यधि सोम स्सोमो - अधि ब्रवीतु
ब्रवी त्वधि सोम स्सोमो - अधि ब्रवीतु ।

9 अधि ब्रवीतु ब्रवी त्वध्यधि ब्रवीतु नो नो ब्रवी
त्वध्यधि ब्रवीतु न : ।

10 ब्रवीतु नो नो ब्रवीतु ब्रवीतु नोऽदिति रदिति र्नो
ब्रवीतु ब्रवीतु नोऽदिति : ।

11 नोऽदिति रदिति र्नो नोऽदिति श्शर्म शर्मादिति र्नो
नो ऽदिति श्शर्म ।

12 अदि॑ति श्शर्म शर्मादि॑ति रदि॑ति श्शर्म॑ यच्छतु यच्छतु
शर्मादि॑ति रदि॑ति श्शर्म॑ यच्छतु ।

13 शर्म॑ यच्छतु यच्छतु शर्म शर्म॑ यच्छतु ।

14 यच्छत्विति॑ यच्छतु ॥

15 आ जं॑ङ्घन्ति जङ्घन्त्या जं॑ङ्घन्ति सानु सानु॑
जङ्घन्त्या जं॑ङ्घन्ति सानु॑ ।

16 जङ्घन्ति सानु सानु॑ जङ्घन्ति जङ्घन्ति सान्वे॑षामेषाꣳ
सानु॑ जङ्घन्ति जङ्घन्ति सान्वे॑षाम् ।

17 सान्वे॑षामेषाꣳ सानु सान्वे॑षा ञ्जघना॑॑ न्जघनाꣳ॑
एषाꣳ सानु सान्वे॑षा ञ्जघनान्॑ ।

18 एषाञ्जघना॑॑ न्जघनाꣳ॑ एषामेषा ञ्जघनाꣳ उपोप॑
जघनाꣳ॑ एषामेषा ञ्जघनाꣳ उप॑ ।

19 जघनाँ उपोप॑ जघना॑᳚ न्जघनाँ उप॑ जिघ्नते
जिघ्नत उप॑ जघना॑᳚ न्जघनाँ उप॑ जिघ्नते ।

20 उप॑ जिघ्नते जिघ्नत उपोप॑ जिघ्नते ।

21 जिघ्नत इति॑ जिघ्नते ॥

22 अश्वा॑जनि प्रचे॑तस : प्रचे॑तसोऽश्वा॑ज न्यश्वा॑जनि प्रचे॑तसो
ऽश्वानश्वा न्प्रचे॑तसो ऽश्वा॑ज न्यश्वा॑जनि प्रचे॑तसोऽश्वान्॑ ।

23 अश्वा॑जनीत्यश्व॑ = अजनि ।

24 प्रचे॑तसोऽश्वानश्वा न्प्रचे॑तस : प्रचे॑तसोऽश्वा॑᳚ न्थ्समथ्सु॑
समथ्स्वश्वा न्प्रचे॑तस : प्रचे॑तसोऽश्वा॑᳚ न्थ्समथ्सु॑ ।

25 प्रचे॑तस इति प्र = चेतस : ।

26 अश्वा॑᳚ न्थ्समथ्सु॑ समथ्स्वश्वानश्वा॑᳚ न्थ्समथ्सु॑ चोदय
चोदय समथ्स्वश्वा नश्वा॑᳚ न्थ्समथ्सु॑ चोदय ।

27 समथ्सु चोदय चोदय समथ्सु समथ्सु चोदय ।
28 समथ्स्विति समत् = सु । चोदयेति चोदय ।।

RJITE PARI VRINGDHI VAAKYAM

ऋजीते परि वृङ्ग्धि नोश्मा भवतु नस्तनू : ।
सोमो - अधिब्रवीतु नोदिति श्शर्म यच्छतु ।।

आ जङ्घन्ति सान्वेषा ञ्जघनाꣳ उप जिघ्नते ।
अश्वाजनि प्रचेतसोश्वा न्थ्समथ्सु चोदय ।।

PDF CREATED BY SHRI P R IYER AND PRIYA R IYER
09 Dec 2021